भूलोकमल्लसोमेश्वर कृत मानसोल्लास में प्रवेश व प्रतिष्ठामुहूर्त के लिए कहा गया है- उत्तरात्रितयं हस्तो रोहिणी रेवती मृगः। पुष्योनुराधा चित्रा च स्वात्याश्विन्यभिजित्तया॥ धनिष्ठा वारुण चेति प्रवेशर्क्षाणि वेश्मनः। सूर्यभूमिसुतौ त्यक्त्वा प्रवेशेऽन्ये शुभावहाः॥ धनुः कुम्भस्तथा कन्या मिथुनं वृषभस्तथा। मीनश्चेति शुभाः वारा राशया लग्नसंगताः॥ लग्नं चतुर्थं दशमं सप्तमं केन्द्रसंक्षितम्। नवं प्रञ्चमं लग्नात् त्रिकोण परिकीर्तितम्॥ केन्द्रत्रिकोणगाः शस्ताः गुरुशुक्रबुधा ग्रहाः। पापास्त्रिलाभषष्ठास्थाः शुभा वेश्मप्रवेशने॥ सुधाकरबलं लब्ध्वा नातिक्षीणे निशाकरे। तिथिं रिक्तां परित्यज्य विशेन्मन्दिरमूर्जितम्॥ (विंशति 3,1,116-121)

मण्डपस्य दिङ्निर्देशः

प्रासादाग्रे तथैशाने(तथैशान्ये ?) उत्तरे मण्डपं शुभम्।

त्रि$_3$ पञ्च$_5$ सप्त$_7$ नन्दै$_9$ कादश$_{11}$ विश्व$_{13}$ करान्तरं(करान्तरे, कम् ?) ॥41॥

प्रतिष्ठा मण्डप के सम्बन्ध के कहा गया है कि देवालय के अग्रभाग में या ईशान कोण अथवा उत्तर दिशा में मण्डप की रचना की जाए। प्रासाद से प्रतिष्ठा मण्डप को तीन, पाँच, सात, नौ, एकादश अथवा तेरह हाथ दूर रखना चाहिए।

कुण्डमण्डपसिद्धि में मण्डप के भूमि की ऊँचाई एवं दो मण्डपों के मध्य अंतराल को भी स्पष्ट किया गया है- उच्चां भूमिं मण्डपस्य प्रकुर्याद्धस्तोन्मानामर्ध हस्तोन्मिता वा। मध्ये भूमिं मण्डपेनोन्मितां च त्यक्त्वा कुर्यान्मण्डपश्चेद् द्वितीयः॥ 1, 14, सिद्धांतशेखर का मत है- स्थलादर्काङ्गुलोच्छ्रयं मण्डपस्थलमीरितम्॥

मण्डपः स्यात् करैरष्ट$_8$ दश$_{10}$ सूर्य$_{12}$ कला$_{16}$ मितैः।

षोडश$_{16}$ हस्ततः कुण्डवशादधिक इष्यते॥ 42॥

मण्डप की रचना आठ, दस, बारह अथवा सोलह हाथ मान से चतुरस्र की जानी चाहिए। यदि कुण्डों का विस्तार हो तो वहां सोलह हाथ से अधिक विस्तृत मण्डप भी बनाया जा सकता है।

कुण्डमण्डपसिद्धि में अधम (10-12 हाथ), मध्यम (12-14 हाथ) तथा उत्तम मण्डप (16-18 हाथ) बताए गए हैं- दशसूर्यकरोन्मितोऽधमः स्यादिनशक्रप्रमितैः करैस्तु मध्यः। धृतिभूपकरोन्मितो वरीयात्रखहस्तोऽप्यथ मण्डपस्तुलायाम्॥[1]

इसी प्रकार लिङ्गपुराण का मत है- दशद्वादशहस्तौ च द्विद्विवृद्ध्या ततः क्रमात्। विंशद्धस्तप्रमाणेन मण्डपं कूटमेव वा। तथाऽष्टादशहस्तेन कलाहस्तेन वा पुनः॥

सिद्धांतशेखर में दस, बीस एवं तीस हाथ के मण्डपों का उल्लेख है- त्रिषूत्तमेषु चैवोक्तस्त्रिंशद्धस्तप्रमाणतः। विंशत्या मध्यमेषूक्तस्त्वन्येषु दशभिः करैः॥

कात्यायनीय शुल्बसूत्रम् में विशेष विवरण है- चतुरस्रं मण्डलं चिकीर्षन्मध्यादे निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति, तस्य तृतीयेन सह मण्डलम् परिलिखेत्स समाधिः॥ (3, 13)

मण्डपमध्यैवेदिकाकुण्डानि-

स्तम्भैः षोडश$_{16}$ भिर्युक्तं(संयुक्तं ?) तोरणादिविराजितम्।

मण्डपे(मण्डपं ?) वेदिका मध्ये पञ्चा$_5$ ष्ट$_8$ नव$_9$ कुण्डकम्॥ 43॥

---

१. वही 15,

प्रतिष्ठा मण्डप को सोलह स्तम्भों वाला बनाएं और स्तम्भों के मध्य भाग को तोरणों से आच्छादित करें। मण्डप के मध्य भाग में वेदिका के साथ पाँच, आठ अथवा नौ यज्ञ कुण्ड भी बनाएं।

वेदिका के सम्बन्ध में आगम रहस्यकार ने कहा है-ततो मण्डपसूत्रं तु त्रिगुणं परिकल्पयेत्। पूर्वादिषु क्रमात् तस्य मध्यभागेन वेदिका॥ [१]

पुनः क्रियासार, संहिता, यामल, कपिल पञ्चरात्रादि के साथ ही सिद्धांतशेखर का मत भी दिया है- वेदी चतुर्विधा तत्र चतुरस्रा च पद्मिनी। श्रीधरी सर्वतोभद्रा दीक्षासु स्थापनादिषु॥ चतुरस्रा चतुःकोणा वेदी सर्वफलप्रदाः तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभाः॥ राज्ञां स्यात् सर्वतोभद्रा चतुर्भद्राभिषेचने। विवाहे श्रीकरी वेदी विंशत्यस्र समन्विता। दर्पणोदरसंकाशा निम्नोन्नत विवर्जिता॥ [२]

कुण्डमण्डपसिद्धि में मण्डप के चारों ओर द्वार बनाने का निर्देश है- दिगन्तराले द्विकरं भवेद् द्वाः चतुष्टयं वेदगजाङ्गुलैस्तत्। विवर्धितं मध्यवरिष्ठयोः स्याद्वेदी त्रिभागेन समाकरोच्चा॥ (वही 16)

कुण्डमानम-

हस्तमात्रं भवेत् कुण्डं मेखला-योनिसंयुतम्।

आगमैर्वेदमन्त्रैश्च होमं कुर्याद् विधानतः॥ 44॥

यज्ञ कुण्ड को एक हाथ मान का बनाएं और उसे तीन मेखलाओं और योनि से युक्त करें। कुण्ड निर्माणोपरांत वहां आगम, वेद मन्त्रों से विधि-विधानपूर्वक होम-हवन करना चाहिए।

आगमरहस्यकार ने सोमशंभु के मत से मेखलादि को चतुर्वर्ण मतानुसार बनाने को कहा है- त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम्। मेखलैकं तु वैश्यस्य प्रोक्तं कुण्ड विशारदं॥ [३]

इसी प्रसंग में कुण्डसिद्धिकार का मत विचारणीय है- अधमा मेखलैका स्यात् मध्यमं मेखलाद्वयम्। श्रेष्ठास्तिस्रोऽथवा द्वित्रिपञ्चस्वधमतादिकम्॥ वही 49 क्रियासार

१. भाग 1, श्लोक 3616
२. वही 3621-3623
३. वही 3720

का मत है- नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम्। कुण्डं द्विमेखलम् मध्यमं नीचं स्यादेकमेखलमिति॥ इसी प्रकार लक्षणसंग्रहकार का कहना है- मुख्यास्तु पञ्च ताः प्रोक्ता मध्यमास्तिस्र एव च। द्वे स्यातां मध्यमे पक्षे एका स्यात्त्वधमाधमेति॥

आहुतिसंख्यानुसारेमानं-

अयुते$_{10000}$ हस्तमात्रं$_1$ च (स्याद, हि ?) लक्षार्द्धे$_{50000}$ तु द्वि$_2$हस्तकम्।

त्रि$_3$हस्तं लक्षहोमे$_{100000}$ तु (स्याद् ?) दशलक्षे$_{1000000}$ चतुः$_4$करम्॥ 45॥

यदि प्रतिष्ठा, वास्तुकर्मावसर पर दस हजार आहुति देनी हो तो एक हाथ का यज्ञ कुण्ड बनाएं। पचास हजार आहुति देनी हो तो दो हाथ, एक लाख आहुति देनी हो तो तीन हाथ तथा दस लाख आहुति देनी हो तो चार हाथ मान का यज्ञ कुण्ड तैयार किया जाना चाहिए।

त्रिंशलक्षे$_{3000000}$ (विंशल्लक्षे ?) पञ्च$_5$हस्तं कोट्यर्धे$_{5000000}$ षट्$_6$करं मतम्।

अशीतिलक्ष$_{8000000}$ऽद्रि$_7$करं कोटि$_{10000000}$होमेऽष्ट$_8$हस्तकं (कराष्टकं ?) 46॥

इसी प्रकार यदि बीस लाख आहुतियां दी जानी हो तो पाँच हाथ, पचास लाख आहुति देनी हो तो छह हाथ, अस्सी लाख आहुति देनी हो तो सात हाथ तथा कोटि आहुतियां देनी हो तो आठ हाथ मान का यज्ञ कुण्ड तैयार किया जाना चाहिए।

आगम रहस्यकार ने इस प्रसङ्ग में शारदातिलक का मत उद्धृत किया है- सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहतम्॥ पुत्रप्रदं योनिकुण्डमर्धेन्द्वाभं शुभप्रदम्। शत्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि॥ छेदमारणयोः कुण्डं षडस्रं पद्मसन्निभम्। पुष्टिदं रोगशमनं कुण्डमष्टास्रमीरितं। मुष्टिमात्रमितं कुण्डं शतार्द्धे संप्रचक्षते। शतहोमेऽरत्निमात्रं हस्तमात्रं सहस्रके॥ द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितम्। दशलक्षेषु षड्हस्तं कोट्यामष्टकरं स्मृतम्॥ एक हस्तमितं कुण्डमेकलक्षे विधीयते। लक्षाणां दशकं यावत् तावद् हस्तेन वर्धयेत्। दश हस्तमितं कुण्डं कोटिहोमे विधीयते॥ [१]

भविष्यपुराण का मत है- मुष्टिमात्रं शतार्द्धे तु शते चाररत्निमानकम्। सहस्रे त्वथ होतव्ये कुण्डं कुर्यात्करात्मकम्॥ द्विहस्तेमयुते तच्च लक्षहोमे चतुष्करम्। दशलक्षमिते होमे षट्करं संप्रचक्षते। अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम्॥

ग्रहपूजाविधानेन (च ?) कुण्डमेक$_1$करं भवेत्।

१. वही 3691-3696

मेखला त्रितयं$_3$ वेद$_4$राम$_3$युग्मा$_2$ङ्गुलेः (युग्माङ्गुलैः ?) क्रमात् ॥ 47 ॥

यदि ग्रह पूजार्थ यज्ञ संपादन करना हो तो एक हाथ मान का कुण्ड बनाएं। इन कुण्डों पर विधि पूर्वक तीन मेखलाएं क्रमशः चार तीन, चार और दो अङ्गुल मान की बनानी चाहिए।

कुण्डसिद्धिकार का मत है कि दिशानुसार कुण्डों का आकार तय किया जाना चाहिए। पूर्व दिशा में चतुरस्र, अग्निकोण में योनि के आकार का, उत्तर में अर्द्धचन्द्र, नैर्ऋत्य में त्रिकोण, पश्चिम में गोलाकार, वायव्य में षटकोण, उत्तर में अष्टदलीय पद्माकार और ईशान कोण में यज्ञ कार्य किया जाना हो तो अष्टकोण वाला कुण्ड तैयार करना श्रेयस्कर है, ये दिशानुसार आठ दिक्पालों के कुण्ड माने गए हैं। कुण्ड की विधि वर्णानुसार भी कही गई है- प्राच्याश्चतुष्कोणभगेन्दुखण्ड त्रिकोणवृत्ताङ्गभुजाम्बुजानि। अष्टास्त्रिशक्रेश्वरयोस्तु मध्ये वेदास्त्रि वा वृत्तमुशन्ति कुण्डम् ॥ आशेशकुण्डैरिह पञ्चकुण्डी चैकं यदा पश्चिमसोमशैवे। वेद्याः सपादेन करेण यद्वा पदान्तरेणाखिलकुण्डसंस्था॥ विप्राच्छुत्यस्त्रं च वृत्तं च वृत्तार्द्धं त्र्यस्त्रि स्याद्वेदकोणानि वापि। सर्वाण्याहुर्वृत्तरूपाणि चान्ये योन्याकाराण्यङ्गनानां तु तानि॥[१]

<u>नवकुण्डीचक्रम्-</u>

दिशा	कुण्ड	फल	योन्यग्र	होतामुख
पूर्व	चतुरस्र	सिद्धिलाभ	दक्षिणयोनि उदग्रा	उत्तरमुख
आग्नेय	योनि	पुत्रलाभ	योनि रहित	उत्तरमुख
दक्षिण	अर्द्धचंद्र	शुभफल	दक्षिणयोनि उदग्रा	उत्तरमुख
नैर्ऋत्य	त्रिकोण	शत्रुनाश	पश्चिमयोनि उदग्रा	पूर्वमुख
पश्चिम	वृत्तकुण्ड	शान्ति	पश्चिमयोनि उदग्रा	पूर्वमुख
वायव्य	षट्कोण	मृत्युच्छेदन	पश्चिमयोनि उदग्रा	पूर्वमुख
उत्तर	पद्मकुण्ड	वर्षा	पश्चिमयोनि उदग्रा	पूर्वमुख
ईशान	अष्टास्र	आरोग्य	पश्चिमयोनि उदग्रा	पूर्वमुख
पूर्वेशान	चतुरस्र	आचार्यकुण्ड	दक्षिणयोनि उदग्रा	उत्तरमुख

मध्य		या वृत्त	प्रथम हवन	
एककुण्डीय		पक्षे चतुरस्रं वृत्तं वा यानि:	पश्चिमपूर्वाग्रा	पूर्वमुख

<u>अथ पञ्चकुण्डीचक्रम्-</u>

क्रम	दिशा	कुण्ड का आकार
1.	पूर्व	चतुरस्राकार
2.	दक्षिण	अर्द्ध चन्द्राकार
3.	पश्चिम	वृत्ताकार
4.	उत्तर	पद्माकार
5.	ईशान	अष्टास्र, चतुरस्र या वृत्ताकार

अथ मण्डलम्-

एक$_1$द्वि$_2$ (हि ?) त्रि$_3$करं कुर्यात् वेदिकोऽपरि मण्डलम्।
ब्रह्म-विष्णु-रवीणां तु (च ?) सर्वतोभद्रमिष्यते ॥ 48 ॥

वेदिका के शीर्ष पर एक, दो अथवा तीन हाथ के मान का मण्डल बनाना चाहिए। ब्रह्मा, विष्णु और सूर्यदेव की प्रतिष्ठा की जानी हो तो सर्वतोभद्र संज्ञक मण्डल की रचना शास्त्रसम्मत है।

शारदातिलक से आगम रहस्यकार ने सर्वतोभद्र मण्डल की विधि को उद्धृत करते हुए कहा कि वास्तुमण्डल की रीति के अनुसार दो कर्ण सूत्र के साथ चौकोर मण्डल सर्वतोभद्र होता है- अथ वेद्यां प्रकुर्वीत मण्डलानि यथाक्रमात्। चतुरस्रे चतुष्कोष्ठे कर्णसूत्रसमन्विते। चतुर्ष्वपि च कोष्ठेषु कर्णसूत्रचतुष्टयम्॥ मध्ये-मध्ये यथा मत्स्या भवेयुः पातयेत् तथा। पूर्वापरायते द्वे-द्वे मंत्री याम्योत्तरायते॥ पातयेत् तेषु मत्स्येषु समं सूत्रचतुष्टयम्॥[१]

भद्रं तु सर्वदेवानां नव$_1$नाभिस्तथा त्रयम्$_3$।
लिङ्गोद्भवं शिवस्यापि लतालिङ्गोद्भवं तथा ॥ 49 ॥

विभिन्न देवों की प्रतिष्ठा के अवसर पर भद्र संज्ञक मण्डल बनाया जाना चाहिए। साथ ही नौ नाभियुक्त लिङ्गोद्भव मण्डल भी बनाएं। शिवलिङ्ग की प्रतिष्ठा के अवसर पर लिङ्गोद्भव तथा लतालिङ्गोद्भव संज्ञक मण्डल बनाना चाहिए।

आगम रहस्यकार ने नवनाभ मण्डल का विधान इस प्रकार बताया है- चतुरस्रे चतुःषष्टिपदान्यारचयेत्। सुधीः। पादैश्चतुर्भिः पद्मं स्यान्मध्ये तत्परितः पुनः॥ वीथीश्चतस्रः कुर्वन्ति मण्डलान्ता-वसानिकाः। दिग्गतेषु चतुष्केषु पङ्कजानि समालिखेत्॥ विदिग्गत चतुष्कानि भित्त्वा षोडशधा सुधीः। मार्जयेत् स्वस्तिकाकारान् श्वेतपीतारुणासितैः। रजोभिः पूरयेत् तानि स्वस्तिकानि शिवादितः। प्राक् प्रोक्तेनैव मार्गेण शेषमन्यत् समापयेत्॥ [१]

भद्रं(भद्रां च ?) गौरीतिलकं च देवीनां पूजने हितम्।

अर्द्धचन्द्रं तडागेषु चापा(वाप्रा ?)कारं तथैव च॥ 50॥

यदि देवियों का पूजन और प्रतिष्ठाकार्य हो तो वहां भद्र और गौरीतिलक संज्ञक मण्डल की रचना करनी चाहिए। जलाशय की प्रतिष्ठा हो तो अर्द्धचन्द्र या धनुषाकार मण्डल की रचना करें।

तन्त्रान्तर ग्रंथ मत को उद्धृत करते हुए आगमरहस्यकार ने कहा है- शक्तस्तु वाञ्छेद् यदि सिद्धिमुग्रां तद्वर्णरत्नैरिह मण्डलानि। आभूषयेन्मौक्तिक पुष्प-राग-माणिक्य-नीलैर्हरितैश्च रत्नैः॥ [२]

टङ्काभं स्वस्तिकं चैव वापी-कूपेषु(कूपादि ?) पूजयेत्(पूजने ?)।

पीठिकाजलपट्टेषु(पीठेषु ?) योन्याकारं तु कामदम्॥ 51॥

वापी, कूपादि की प्रतिष्ठा में टङ्काभ और स्वास्तिक संज्ञक मण्डल की पूजा करनी चाहिए। पीठिका तथा जलपीठ या जलपट्ट की प्रतिष्ठा में योन्याकार मण्डल की पूजा करने से मनोरथ सिद्ध होते हैं।

गजदन्त(जगदन्तं ?) महादुर्गे प्रशस्तं मण्डलं यजेत् (भवेत् ?)।

टङ्काभं चतुरस्रं च गजदन्त मिहायतम्(महायतम् ?)॥ 52॥

वृहद् दुर्ग की प्रतिष्ठा के अवसर पर गजदंत संज्ञक मण्डल की पूजा करें। गजदंत मण्डल लंबाकार होता है जबकि टङ्काभ मण्डल चतुरस्र या समचोरस है।

१. वही 3818–3821
२. वही 3308

विख्यातं सर्वतोभद्रं ज्ञेयान्यानि च लोकतः(ज्ञेयमन्योऽन्यलोकतः ?)।

पूर्वादितोरणं प्लक्ष-यज्ञाङ्ग-वट-पिप्पलैः॥ 53॥

सभी मण्डलों में सर्वतोभद्र मण्डल ही विशेष रूप से प्रसिद्ध है, इसके और अन्य मण्डलों के आकार-निर्माणादि के विषय में सूत्रसंतान या अपराजितपृच्छादि अन्य शास्त्रों का अवलोकन करना चाहिए। पूजा, हवनादि के अवसर पर यज्ञ मण्डप में पूर्वादि दिशाओं में प्लक्ष या पाकड़, यज्ञाङ्ग या उदुम्बर, वट और पीपल के पत्तों के तोरण बनाकर टांगने चाहिए।

अथातौ ऋत्विजसङ्ख्यया-

द्वात्रिंशत्$_{32}$ षोडशा$_{16}$ष्टौ$_{8}$ च ऋत्विजो(रुत्तमान् ?) वेदपारगान्।

कुलीनानङ्गसंपूर्णान्(कुलिनोऽनङ्गसर्वज्ञान् ?) यज्ञार्थमभिमन्त्रयेत्॥ 54॥

यज्ञ अवसर पर विद्वान पुरुष को यज्ञकर्म विशारद 32, 16 या 8 ऋत्विजों को आमन्त्रित करना चाहिए। ऋत्विजों को सम्पूर्ण रूप से वेद-वेदाङ्गों का ज्ञान हो और वे अच्छे कुल से तथा सर्वाङ्ग या अङ्गभङ्ग दोष से मुक्त होने चाहिए।

अथातो देवस्नानविधौ-

मण्डपस्य त्रि$_{3}$भागेन चोत्तरे(उत्तरे ?) स्नानमण्डपम्।

स्थण्डिलं वालुकं कृत्वा शय्यायां(सौर्म्यां ?) स्नापयेत्सुरम्॥ 55॥

देव पूजा, स्नानादि के लिए निर्देश है कि सर्व प्रथम मण्डप को इस प्रकार नौ भागों में विभाजित करें कि आठों दिशा में आठ भाग और मध्य में एक भाग बनें। इसमें उत्तर दिशा के भाग में स्नान मण्डप बनाएं और उसी में बालु का एक स्थण्डिल बनाकर उस पर उचित आसन पर प्रतिष्ठेय देव को स्नानार्थ बिराजित करें।

स्थण्डिल की रचना के संदर्भ में आगमरहस्य में पिङ्गलामत, वायवीयसंहिता, शारदातिलक, कुण्डसिद्धि के मत से कहा गया है- होमे प्रशस्यते कुण्डं स्थण्डिलं वा हसन्तिका। अथाग्निकार्यं वक्ष्यामि कुण्डे वा स्थण्डिलेऽपि वा। वेद्यां वाप्यायसे पात्रे मृण्मये वा नवे शुभे॥ स्थण्डिलं बालुकाभि र्वा रक्तमृदुरजसापि वा॥ नित्यं नैमित्तिकं होमं स्थण्डिले वा समाचरेत्। हस्तमात्रेण तत् कुर्याद् बालुकाभिः सुशोभनम्। अङ्गुलोत्सेधसंयुक्तं चतुरस्रं समन्ततः॥ अथवापि मृदा सुवर्णभासा करमानं चतुरङ्गुलोच्चमल्पे। हवने विदधीत चाङ्गुलोच्चं विबुध स्थण्डिलमेव वेदकोणम्॥ मृदा

स्वर्णभया वापि सूक्ष्मवालुकयापि वा। अङ्गुलोच्चं तथा वेदाङ्गुलोच्चं स्थण्डिलं विदुः॥ चतुःकोणमुदक्प्राचीप्लवमल्पाहुतौ शुभम्। पञ्चाङ्गुलोच्च मथवा वस्वङ्गुलसमुन्नतम्॥ यथोक्तानि विधायाथ कुण्डानि मण्डलान्यथ। रचयेदुक्तमार्गेण यागपूर्तिकराणि च॥[१]

पञ्चगव्यैः कषायैश्च वल्कलैः क्षीरवृक्षजैः।

स्नापयेत् पञ्चकलशैः शतवारं$_{100}$ जलेन च॥ 56॥

इसके बाद पञ्चगव्य से, कषाय वर्ग की औषधियों और खिरनी वृक्ष की छाल के चूर्ण से स्नान योग्य विशिष्ट जल को तैयार करें। इस विशेष जल के पाँच-पाँच कलश एक साथ भरकर सौ बार उक्त देव को स्नानकरा शुद्ध कराएं।

देवस्नपनविधि प्रतिष्ठामयूख में विस्तार से आई है- *दश क्रमात्पुष्पैः फलः सौवर्णजलेन गोशृङ्गोदकेन धान्यैः सहस्रछिद्रैः सर्वौषधिभिः पञ्चपल्लवैस्तीर्थोदकैर्नवरत्नर्युताः कार्याः॥ अवशिष्टेषु दशसु कलशेषु कदम्बशाल्मलीजंब्वशोकप्लक्षचूतटबिल्वनागकेशर पलाशपल्लवान्क्रमेण निक्षिप्य शुद्धजलमापूर्य लोकपालानावाहयेत्। सर्वेऽप्याकलशेष्वित्तेन स्थाप्याः।*[२]

एतद् अवसरेकरणीयकृत्याः

वेद मन्त्रादि (मन्त्रैश्च ?)-वादित्रै-गीतमङ्गलनिःस्वनैः।

वस्त्रेणाच्छादयेद्देवं(दीशं ?) वेद्यांतं(वेद्यंते ?) मण्डपे न्यसेत्(यजेत् ?) 57

प्रतिष्ठेय देवता के स्नानोपचार के अवसर पर ऋचाओं का उच्चारण हों, वाद्यवृंद वाद्यवादन करें, नाना प्रकार के माङ्गलिक गीतों से गगन गुञ्जार हो। स्नानोपचार के उपरांत देवार्चा को पवित्र वस्त्राच्छादित करें और पुनः मण्डप स्थित स्थण्डिल पर स्थापित करें।

प्रतिष्ठामयूख के अनुसार मृत्तिका स्नान के समय निम्न मंत्र का उच्चारण करें- अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतासि जिन्वति॥[३]

कषायस्नान के समय इस मंत्र का निर्देश है- यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न संशिषम्॥[४]

१. वही 3776-3781
२. पृष्ठ 42
३. ऋग. 8, 44, 16
४. वही 6, 48, 1

गोमूत्र से स्नान के समय यह मंत्र उच्चारित करें- तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥[१]

गोबर स्नान के समय निम्न मंत्र उच्चारित करने का निर्देश है- गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥[२]

भस्मी से स्नान के समय का मंत्र है- मा नस्तो के तनये मान आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान् मा नो रुद्रभामिनोवधीर्हविष्मन्तः सदमित् त्वा हवामहे॥[३] *इसी प्रकार गन्धजल से स्नान के समय 'तत्सवितुः' मंत्र उच्चारित करें।*

देवशयनौ-

तल्प(तूल्या ?)मारोपयेद्वेद्यामुत्तराङ्घ्री(राङ्घि ?) न्यसेत् ततः।

कलशं तु शिरोदेशे पादस्थाने कमण्डलुम्॥ 58॥

इसी अवसर पर ईशानकोण की वेदिका के ऊपर देवता का शय्यासन स्थापित करें और देव के चरण उत्तर दिशा में रखें। देव के शीर्ष के समीप कलश और चरणों के निकट कमण्डलु रखा जाना चाहिए।

व्यजनदर्पणादि-

व्यजनं दक्षिणे देशे दर्पणं वामतः शुभम्।

रत्नन्यासं ततः कुर्याद्दिक्पालादिकपूजनम्॥ 59॥

देवता के दक्षिण भाग में व्यजन या विजण-पङ्खा तथा वामाङ्ग में दर्पण को रखना चाहिए। इसके बाद अग्र निर्देशानुसार पूर्वादि दिशाओं में वज्रादि रत्नों को स्थापित कर दिक्पालों का पूजन करें।

आग्नेयां गणेशं विद्यादीशानेग्रहमण्डलम्।

नैर्ऋत्ये वास्तुपूजा च वायव्ये मातरः स्मृताः॥ 60॥[४]

१. वही 3, 62, 10
२. ऋग.परि.11, 9
३. ऋग. 1, 114, 8
४. यह श्लोक मातृका 'क' एवं कोलकाता पाठ में नहीं है।

देवता के आग्नेय कोण में गणेश और ईशानकोण में नवग्रह मण्डल बनाना चाहिए। नैर्ऋत्यकोण में वास्तुपूजा तथा वायव्यकोण में मातृ देवता की स्थापना करने का विधान है।

अथ रत्नन्यास:

वज्रं-वैडूर्यकं-मुक्ता-मिन्द्रनीलं-सुनीलकम्।

पुष्परागं च गोमेदं प्रवालं(चन्द्रं ?) पूर्वादितो न्यसेत् (पूर्वत: क्रमात्)॥ 61

देवता को रत्नन्यास करने के लिए पूर्वादि दिशाओं में सृष्टि क्रम से आठ रत्नों को रखना चाहिए। ये रत्न हैं- वज्र अथवा हीरा, वैडूर्य, मुक्ता, इन्द्रनील, नीलम, पुष्पराग, गोमेद और प्रवाल।

अथ धातुन्यास:

सुवर्णं-रजतं-ताम्रं-कांस्यं-रीतिं च सीसकम्।

बङ्गं-लोहञ्च पूर्वादौ(पूर्वादि ?) सृष्ट्या धातूनिहा न्यसेत्॥ 62॥

देवता को धातु न्यास करने के लिए पूर्वादि दिशाओं में सृष्टिक्रम से स्वर्ण, रजत, ताम्र, कांस्य, पीतल, सीसा, रांगा और लोह धातुओं को रखना चाहिए।

अथ औषधिन्यास:

वज्री(वचा ?)-वह्नि:-सहदेवी-विष्णुक्रान्ते-न्द्रवारुणी।

शङ्खिनी-ज्योतिष्मती-चैवेश्वरी तान्(ता ?) क्रमान्न्यसेत्॥ 63॥

सृष्टिक्रमानुसार ही पूर्वादि दिशाओं में वज्रदन्ती, वह्नि या चित्रक, सहदेवी, विष्णुकांता, इन्द्रवारुणी, शङ्खपुष्पी, मालकांगुनी या ज्योतिष्मती और शिवलिङ्गी औषधियों को रखकर देवार्चा का औषधिन्यास करना चाहिए।

मातृका 'क' में लिपिकार ने इस श्लोक को 62वें श्लोक से पूर्व लिख दिया किंतु बाद में इसे सुधारने का संकेत भी दिया है।

अधुना धान्याधिवास-

यवो-व्रीहिस्तथा-कङ्गु-जूर्णाह्वा च तिलैर्युता:॥

शाली-मुद्रा समाख्याता गोधूमाश्च क्रमेण तु॥ 64॥

देव प्रतिमा को धान्याधिन्यास के लिए पूर्वादि दिशाओं में सृष्टिक्रमानुसार यव या जौ, व्रीहि, कङ्गु, ज्वार, तिल, शालीधान्य या चावल, मूंग और गेहूं को रखें।

आचार्यशिल्पीसम्मानं-

यद्देवाभरणं पूजा वस्त्रालङ्कारभूषणम्।

तत्सर्वं शिल्पितो देयमाचार्याय(दद्याचार्याय ?) च यज्ञियं (तु याज्ञिकम्)॥

देवी-देवताओं की प्रतिष्ठा के कार्य में जो आभरण, वस्त्रालङ्कार आदि चढ़ाए जाते हैं, उन सबको आचार्य तथा शिल्पियों को प्रदान करना चाहिए। आचार्य को यज्ञ संपादनकार्य में प्रयुक्त द्रव्यादि देना चाहिए।

महोत्सवावसरे कृत्यादीनां-

ततो महोत्सवं कुर्यान्नृत्य-गीतैरनेकश:।

नैवेद्यारात्रिकं पूजामङ्गन्यासादिकं तथा॥ 66॥

प्रतिष्ठा कार्य के अवसर पर नाना नृत्य, गीतों से भरापूरा मङ्गल समारोह भी करना चाहिए। देवता को नैवेद्य अर्पित करें, आरती-निराजन करें तथा अङ्गन्यासादि पूजा कृत्य संपादित करें।

इस सम्बन्ध में प्रतिष्ठामयूखकार का निर्देश है कि देवजागरण में पुरुषसूक्तोक्त सहस्रशीर्षा (ऋग.10, 90, 1-16) से स्तुति करें और रथ पर चढ़ाकर मङ्गलघोष करते हुए 'कनिक्रदद्' (ऋग. 2, 42, 1-3) सूक्त के साथ प्रासाद के प्रदक्षिणक्रम से लाएँ व यागमण्डप के पश्चिमद्वार में 'आ कृष्णेन' मंत्र से प्रवेशकर वेदी के पश्चिम भाग में पश्चिमाभिमुख देव को बिठाकर मधुपर्क करें। न्यास विधि प्रतिष्ठामयूख में हैं।

क्षीरं क्षौद्रं घृतं खण्डं पक्वान्नानि बहून्यपि।

षड्रसा: स्वादु भक्ष्याणि सन्मानं(समन्तात् ?) परिकल्पयेत्॥ 67॥

नैवेद्य में दूध, मधु, घृत और खाण्ड से बने मिष्ठान्न, पक्वान्न तथा षट्रस व्यञ्जन देवता के सम्मुख सम्मानपूर्वक अर्पित करना चाहिए।

ततो विप्रनिर्देश:

विप्राणां सम्प्रदायैश्च(सम्प्रदायाच्च ?) वेदमन्त्रैस्तथागमै:।

सकली(सङ्कली ?)करणं जीव (देव ?) न्यासं कृत्वा प्रतिष्ठयेत्॥ 68॥

इसके अनन्तर विप्रजनों को अपने-अपने सम्प्रदायों में स्वीकार्य वेदादि मन्त्रों और आगम निर्दिष्ट आचार के अनुसार सकलीकरण का कार्य करें और देवार्चा में प्राण प्रतिष्ठापन करें।

देवालयेन्यास:

प्रासादे देवतान्यासं स्थावरेषु पृथक्-पृथक्।

खर(स्व ?)शिलायां च वाराहं पौल्यां नागकुलानि च॥ 69॥

प्रतिष्ठावसर पर देवालय के प्रत्येक अंग की पूजा करनी चाहिए। थरों तथा अङ्ग-उपाङ्गों में निर्दिष्ट देवताओं का न्यास करते हुए पृथक-पृथक पूजन-सम्मान प्रदान करें। खरशिला में वराहदेव और पौल्या अथवा भीट्ट के थर पर नागदेव का न्यास करना चाहिए।

प्रकुम्भे जलदेवांश्च पुष्पके किंसुरांस्तथा।

नन्दिनं जाड्यकुम्भे च कर्णाल्या(कणाल्पाल्यां ?) स्थापयेद्धरिम्॥ 70॥

प्रासाद के कुम्भ थर में जलदेव, पुष्पकण्ठ के थर में किन्नर, जाड्यकुम्भ में नंदिन और कर्णिका थर में श्रीहरि का न्यास करना चाहिए।

गणेशं गजपीठे च (स्याद ?) अश्वपीठे तथाश्विनौ।

नरपीठे नरांश्चैव क्षमाञ्च क्षुरके यजेत्॥ 71॥

प्रासाद के गजपीठ पर गणेश, अश्वपीठ में अश्विनीकुमार, नरपीठ में नरदेव और क्षुरक या खुरा के थर में पृथ्वीमाता का न्यास कर अर्चना करनी चाहिए।

भद्रे संध्यांत्रयं (संध्यातरं ?) कुम्भे पार्वतीं कलशेचयेत्(स्थिताम् ?)।

कपोताल्यां च गन्धर्वान्मञ्चिकायां सरस्वतीम्॥ 72॥

इसी प्रकार भद्र के कुम्भ में त्रिकाल संध्या, कलश थर में पार्वती, कपोतावली में गन्धर्व और मञ्चिका के थर में वाग्देवी सरस्वती का न्यास और अर्चन करें।

जङ्घायां च दिशापालानिन्द्रमुद्गमे संस्थितम्।

सावित्रीं भरणेदेशे शिरावट्यां च देविकाम् (वेदिकाम् ?)॥ 73॥

प्रासाद के जंघाभाग में दिक्पाल, उद्गम थर पर इन्द्र, भरणदेश पर सावित्री तथा शिरावटी के थर पर देविका का न्यास करें।

विद्याधरान्कपोताल्यामन्तराले सुरांस्तथा(सुरस्तथा ?)।

पर्जन्यं कूट(कुंठ ?)च्छाद्ये च ततो मध्ये प्रतिष्ठयेत्॥ 74॥

इसी भांति कपोतावली के थर पर विद्याधरों, अंतराल थर पर किन्नर आदि देव, कूट छाद्य पर पर्जन्यदेव का न्यास करना चाहिए। इसके बाद प्रासाद के आंतरिक भाग के देवों का न्यासक्रम कहा जा रहा है।

शाखयोश्चन्द्रसूर्यौ च त्रिमूर्तिश्चोत्तरङ्गके।

उदुम्बरे स्थितं यक्षमश्विनावर्द्धचन्द्रके॥ 75॥[१]

प्रासाद की द्वार शाखाओं में चंद्रमा और सूर्य, उत्तरङ्ग में ब्रह्मादि तीनों देवता, उदुम्बर में यक्ष तथा शंखावटी या अर्द्धचंद्र पर देववैद्य दोनों अश्विनीकुमारों का न्यास करना चाहिए।

कौलिकायां धराधारं क्षितिं चोत्तानपट्टके।

स्तम्भेषु पर्वतांश्चैवमाकाशं च करोटके॥ 76॥

प्रासाद की कौलिका में धराधार, उत्तानपट्ट में पृथ्वी या क्षिति, स्तम्भ में पर्वत और आकाशीय छत में आकाशदेव का न्यासकर पूजन करना चाहिए।

मध्ये प्रतिष्ठयेद्देवं मकरे जाह्नवीं तथा।

शिखरस्योरुशृङ्गेषु पञ्च पञ्च प्रतिष्ठयेत्॥ 77॥

देवालय के मध्य में मध्यस्थ देव, मकर मुखी प्रणाल पर भगीरथी गंगा, शिखरस्थ उरुशृंगों में पञ्चदेवों का न्यास करें और यथाविधि पूजा करें।

ब्रह्मा-विष्णुस्तथा सूर्य(रुद्र ?) ईश्वरीश्च (ईश्वर च ?) सदाशिवः।

शिखरे चेश्वरं देवं शिखायां तु सुराधिपम्॥ 78॥

पूर्व वर्णित उरुशृंगों में न्यास करने योग्य देव हैं- ब्रह्मा, विष्णु, सूर्य, पार्वती और शिव। शिखर में ईश्वर और शिखा में सुराधिपति इन्द्र का न्यास करना चाहिए।

ग्रीवायाम्बरं(-याममरं ?) देवं मण्डके (मण्डपे ?) च निशाकरम्।

पद्माक्षं पद्मपत्रं च कलशे च सदाशिवम्॥ 79॥

---

१. 'क' मातृका में लिपिकार की त्रुटि से द्वितीय पङ्क्ति में 'स्तम्भेषु पर्वतांश्चैवमाकाशं च करोटके' पाठ अङ्कित हो गया है।

प्रासाद के शिखर की ग्रीवा में अंबर देव, मुख्य शृंगों और आमलक में चंद्रमा, पद्मपत्र, पद्मशिला में पद्माक्ष तथा कलश में सदाशिव का न्यास कर अर्चना करें।

सद्यो-वाम-अघोर(-वामस्तथाघोर ?)स्तत्पुरुष(षं ?) ईश एव च।

कर्णादि भद्रपर्यन्तं(गर्भपर्यंतं ?) पञ्चाङ्गे तान्प्रतिष्ठयेत् ॥ 80 ॥

इति स्थावर प्रतिष्ठा।

प्रथम सद्योजातदेव, दूसरे वामदेव, तीसरे अघोर, चौथे तत्पुरुष और पाँचवें ईश का कर्ण से लेकर भद्रस्थान पर्यंत पाँचों अंगों- क्रमशः कर्ण, प्रतिरथ, रथ, प्रतिभद्र और मुखभद्र में न्यास करें।

अथाद्यदर्शनं-

प्रथमं देवताद्दष्टेर्दर्शयेदन्त-र्धाहितम् (-दर्शयेधान्यपर्वतम् ?)।

विप्रेकुमारिकां वास्तु(वस्तु ?) ततो लोकान् प्रदर्शयेत् ॥ 81 ॥

देवालय, देव प्रतिष्ठा के उपरांत रात्रि को देवालय के किंवाड़, पट्ट बन्ध रहते हैं अतः दूसरे दिन भोर वेला में सर्व प्रथम देव दर्शन की रीति को सम्पन्न करना चाहिए। देवता का प्रथम दर्शन विप्र कन्या को करवाएं। तदोपरांत लोक के लिए दर्शन खोलने चाहिए।

सूत्रधारपूजनं-

इत्यनन्तररतः(ईज्यानन्तरतः, इत्येवं विविध ?) कुर्यात् सूत्रधारस्य पूजनम्।

वस्त्रालङ्कारै-भू-वित्त-गो-महिष्यश्व(श्व ?) वाहनैः ॥ 82 ॥[१]

विधिपूर्वक देव स्थापना के उपरांत प्रासाद के स्थपति या सूत्रधार का सम्मान करना कर्त्तव्य है। सूत्रधार को सम्मान स्वरूप वस्त्रालङ्कार, भूमि, धन, गाय, भैंस, अश्व आदि वाहन प्रदान करना चाहिए।

अन्येषां शिल्पिनां पूजा कर्त्तव्या कर्मकारिणाम्।

स्वाधिकारानुसारेण वस्त्रैस्ताम्बूल(वस्त्रतांबूल ?)भोजनैः ॥ 83 ॥

देव वास्तु के निर्माणकाल में परिश्रम करने वाले अन्य शिल्पियों, कारीगरों और कर्मकारों का भी उनके कार्याधिकार या दक्षता के अनुरूप वस्त्र, ताम्बूल प्रदान कर भोजनादि करवाया जाकर सम्मान देना चाहिए।

अथ प्रासादनिर्माणफलं-

काष्ठ-पाषाणनिर्माणकारिणो यत्र मन्दिरे।

भुञ्जते(भुंक्तेऽसौ च ?) तत्र सौख्यं (भुक्ते सो ?) शङ्करस्त्रिदशैः सह ॥ 84 ॥

जो कोई व्यक्ति श्रद्धापूर्वक काष्ठ, पाषाणादि से प्रासाद का निर्माण करवाता है, वह कैलाशवास पर भगवान शिव और अन्य देवों के साथ सुरप्राप्य सुख का उपभोग करता है।

प्रार्थयेत् शिल्पिनः

पुण्यं प्रासादजं स्वामी प्रार्थयेत् सूत्रधारतः।

सूत्रधारो वदेत्- 'स्वामिन्नक्षय्यं भवतात् तव!' ॥ 85 ॥

इति सूत्रधारपूजा।

देवालय-निर्माण के पुण्य की प्राप्ति के लिए निर्माता को सूत्रधार से निवेदन करना चाहिए। निर्माता के निवेदन पर सूत्रधार को आशीर्वचन देते हुए कहना चाहिए- 'हे पुण्यशील स्वामी! तुम्हारे इस परिश्रम का पुण्य अक्षय हो।'

अथाचार्यपूजनं-

आचार्य पूजनं कृत्वा वस्त्र-स्वर्ण-धनैः सह।

दानं दद्याद् द्विजातिभ्यो दीनान्धदुर्बलेषु च ॥ 86 ॥

प्रासाद के प्रतिष्ठाकार्य के संपादन के उपरांत निर्माता को आचार्य का पूजन करना कर्त्तव्य हैं। आचार्य को इस अवसर पर वस्त्र, स्वर्ण-संपदा आदि प्रदान करना चाहिए। इसके बाद नगर और कुल के ब्राह्मणों को दान दें, दीन, अंध, दुर्बलों को भी यथेष्ट दानादि प्रदान करें।

सर्वेषां धनमाधारः प्राणिनां जीवनं परम्।

वित्ते दत्ते प्रतुष्यन्ति मानुषाः पितरः सुराः ॥ 87 ॥

इति प्रतिष्ठाविधि।

धन ही सभी प्राणियों के जीवन संचालन का मुख्य आधार है और इसी से जीवन की श्रेष्ठता है। धन-संपदा के दान से मनुष्य ही नहीं, पितृगण और देवगण भी संतुष्ट और प्रसन्न होते हैं।

अधुना जिनदेवप्रतिष्ठा:

प्रतिष्ठा वीतरागस्य जिनशासनमार्गत:।

नवकारैसु(सूरि ?) मन्त्रैश्च सिद्धकेवलि(-द्धिकेवल ?)भाषितम्॥ 88॥

जिनालयों में वीतराग प्रभुओं की प्रतिष्ठा का कार्य जिन शासन के मार्गों में निर्धारित विधि के अनुसार ही करना चाहिए। सिद्धता को प्राप्त ज्ञानीजनों द्वारा प्रशंसित णमोकार मन्त्र और सूरियों के मन्त्रों के उच्चारपूर्वक इस प्रतिष्ठा को सम्पादित करें।

ग्रहा: सर्वज्ञदेवास्य(श्च ?) पादपीठे प्रतिष्ठिता:।

येनानन्तविभेदेन मुक्तिमार्ग उदाहृत:॥ 89॥

जिनालयों के प्रतिष्ठावसर पर सर्वज्ञदेव की पादपीठ पर नवग्रहों की स्थापना करनी चाहिए। जिनदेवों को अनन्तभेद वाला और मोक्षमार्ग का अनुगामी माना गया है।

जिनानां मातरो यक्ष-यक्षिणी(-क्षिण्यो ?) गौतमाय च (गौतमीत्तथा ?)।

सिद्धा: कालत्रये(त्रयो ?) जाताश्चतुर्विंशति$_{24}$ मूर्त्तय:॥ 90॥

जिन शासन में मातृकाओं, यक्ष, यक्षिणियों, गणधर गौतम, त्रिकाल सिद्ध जिन देवों, चौबीस तीर्थंकरों की मूर्तियां होती है। अर्थात् प्रत्येक तीर्थंकर के यक्ष, यक्षिणी होते हैं। महावीर के साथ गणधर गौतम आदि हुए। इस मत के अनुसार शासन देवियां भी होती हैं।

इति स्थाप्या जिनावासे(वारे ?) त्रि$_3$ प्राकारं गृहं तथा।

सांवर्ण(सावंत ?) शिखिरं मन्दीसर(नंदीश्वरं ?) त्वष्टापदादिकम्॥ 91॥

जिनालयों में उक्त प्रतिमाओं को स्थापित करना चाहिए। जैन मन्दिर को समवसरण युक्त, संवरणान्वित शिखर युक्त, मन्दारक या आमलक (नंदीश्वर दीप ?) सहित अष्टापद बनाया जाना चाहिए।

प्रासादो वीतरागस्य पुरमध्ये सुखावह:(T ?)।

नृणां कल्याणकारी (गृहस्य ?) स्याच्चतुर्दिक्षु प्रकल्पयेत्॥ 92॥

इति जिनप्रतिष्ठा।

जिनालय को नगर के मध्य में बनाना सुख प्रदायक माना जाता है। यह गृहस्थों का कल्याण करता है, किंतु सभी दिशाओं में भी इनका निर्माण किया जा सकता है।

अथ जलाश्रयोप्रतिष्ठा:

माघादिपञ्चमासेषु वापीकूपादि संस्कृतम्(संस्मृतम् ?)।

तडागस्य चतुर्मासं(चतुर्मास्यां ?) कुर्यादाषाढमार्गयो:॥ 93॥

माघ, फाल्गुन, चैत्र, वैशाख और ज्येष्ठ मास में वापी और कूप का जल संस्कार और उनकी प्रतिष्ठा करनी चाहिए, इसमें मीन संक्रांति का त्याग करें। सरोवर, बांध की प्रतिष्ठा चातुर्मास के आषाढ़, श्रावण, भाद्रपद, आश्विन, कार्तिक और मार्गशीर्ष में की जानी चाहिए।

इस संबंध में महर्षि गर्ग का मत है- देवतारामवाप्यादि प्रतिष्ठामुत्तरायणे। माघादिपञ्चमासेषु कृष्णे त्वापञ्चमीदिनम्॥ तस्मिन्सलिलसम्पूर्णे कार्तिके च विशेषत:। तडागस्य विधि: कार्य: स्थिर नक्षत्रयोगत:॥ [१]

असंस्कृतं जलं देवा: पितरो न पिबन्तिते(तत् ?)।

संस्कृते तृप्तिमायाति(तृप्तिमायान्ति ?) तस्मात् संस्कारमाचरेत्॥ 94॥

जलस्रोतों का विधि पूर्वक संस्कार किया जाना चाहिए। संस्कार के अभाव में देवता और पितृगण भी उनका पानी नहीं पीते। संस्कृत हुआ जल सभी को तृप्त, संतुष्ट करता है अत: नए जलस्रोत का संस्कार किया जाना श्रेयस्कर है।

जलाश्रयनिर्माणपुण्यं-

जीवनं वृक्षजन्तूनां य: करोति (यो ?) जलाशयम्।

दत्ते वा स लभेत्(लभते ?)सौख्यमुर्व्यां स्वर्गे च मानव:(T: ?)॥ 95॥

वनस्पति, जन्तु और जीव मात्र का जीवन जल ही है। जो व्यक्ति जलाशयों का निर्माण करवाता है, वह इस जीवन में सभी सुखों को प्राप्त करता है और जीवन पूर्णकर स्वर्ग का अधिकारी होता है।

विष्णुधर्मोत्तरपुराण में कहा गया है कि भूलोक और स्वर्गलोक में जल के बिना जीवन असंभव है, इसलिए धर्मात्मा और विद्वान पुरुष को चाहिए कि वह अनेक

---

१. बृहद्दैवज्ञरञ्जनम् 84, 2-3

स्थानों पर जलाश्रयों का निर्माण कराएं। कूप खुदवाने का फल अग्निष्टोम या यज्ञ के समान है और वह भी यदि मरुस्थल में खुदवाएं तो उसका फल अश्वमेधयज्ञ के तुल्य फल होता है। पर्याप्त जल वाला कूप खुदवाने वाले के समस्त पापों का हरण कर लेता है। कूप का निर्माता स्वर्ग में जाकर सभी प्रकार के सुखों का उपभोग करता है, उसमें भी भोग की निपुणता स्थान विशेष के आधार पर कही जाती है- उदकेन विनावृत्तिर्नास्ति लोकद्वये सदा। तस्ताज्जलाशयाः कार्याः पुरुषेण विपश्चिता॥ अग्निष्टोमसमः कूप सोऽश्वमेधसमो मरौ। कूपः प्रवृतपानीयः सर्व हरति दुष्कृतम्॥ कूपकृत्स्वर्गमासाद्य सर्वान् भोगान् समुश्नते। तत्रापि भोगैपुण्यम् स्थानाभ्यासात् प्रकीर्तितम्॥ (3, 296, 5-7)

अथ वास्तुपुरुषोद्भवः

पुरान्धकवधे रुद्रः ललाटात् पतितः क्षितौ।

स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्त दुःसहम्॥ 96॥

पुराकाल में अन्धकासुर और शिव के मध्य युद्ध हुआ। इस समय शिव के ललाट से जो पसीना भूमि पर गिर पड़ा, उसे आकाश और पृथ्वी के मध्य एक भयानक दीर्घकाय जीव उत्पन्न हुआ।

गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।

जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः॥ 97॥

उसे खतरा मानकर वहां विद्यमान सभी देवताओं ने उसे पकड़ लिया और पृथ्वीतल पर इस तरह औंधे मुख गिराया कि उसके दोनों जानु हाथ की दोनों कोहनियां वायव्य तथा आग्नेय कोण में और पांव नैर्ऋत्य कोण एवं सिर ईशान कोण में रहा।

चत्वारिंशद्युताः पञ्च$_{45}$ वास्तुदेहे स्थिताः सुराः।

देव्याऽष्टौ$_{8}$ बाह्यगास्तेषां वसनाद्वास्तुरुच्यते॥ 98॥

इस प्रकार औंधे मुख गिराया वह पुरुष वास्तु पुरुष हुआ। उसके शरीर पर पैतालिस देव स्थित हो गए जबकि बाहर चारों ही कोनों पर आठ देवियां स्थित हुईं। इस प्रकार वास्तु पुरुष की देह पर कुल 53 देवी-देवताओं का निवास होता है।

वास्तुपुरुषः तस्य पूजनञ्च

अधोमुखेन विज्ञप्तौ त्रिदशान्(विज्ञप्तैस्त्रिदशै ?) विहितो बलिं(: ?)।

तेनैव बलिना शान्तिं कुरुते(करोति ?) हानिमन्यथा॥ 99॥

यह देवदमित वास्तु पुरुष देवताओं से कहता है कि जो कोई गृहकर्ता व्यक्ति मुझ पर अवस्थित देवताओं को सविधि बलि, पूजा प्रदान करेगा तो मैं उसे शांति प्रदान करूंगा और इसके अभाव में हानि, कुपरिणाम करूंगा।

प्रासाद-भवनादीनां प्रारम्भे-परिवर्तने।

वास्तुकर्मसु(कर्मेषु ?) सर्वेषु पूजितः सौख्यदो भवेत्॥ 100॥

ऐसे में विद्वानों को चाहिए कि वे प्रासाद, भवनादि के प्रारंभ और सम्पूर्ण होने तक वास्तु पूजन करवाएं। वास्तु पूजन से ही वहां सुख सरिता का प्रवाह होता है।

विविधपद्वास्तुविधानं-

एक$_{1}$पदादितो वास्तुर्यावत् पदसहस्रकम्$_{1000}$।

द्वात्रिंश$_{32}$न्मण्डलानि स्युः क्षेत्रतुल्याकृतीनि च॥ 101॥

वास्तुपूजा के लिए एक से लेकर एक हजार पद तक के वास्तु रचना का विधान है। वास्तु पूजन के निमित्त बत्तीस मण्डल हैं जो तत्स्थलीय भूमि-क्षेत्र के समान ही बनते हैं।

चतुष्षष्टिपदश्च एकाशीतिपदं-

एकाशीति$_{81}$पदो वास्तुश्चतुःषष्टि$_{64}$पदोऽथवा।

सर्ववास्तुविभागेषु पूजयेन्मण्डलद्वयम्॥ 102॥

जैसा कि पूर्व में कहा गया वास्तु पूजन के बत्तीस मण्डल हैं। इन मण्डलों में से दो मण्डलों- इक्यासीपद वास्तु और चौंसठपद वास्तु का सर्वसमय पूजन किया जाना चाहिए।

राजवल्लभवास्तुशास्त्रम् में इन वास्तुमण्डलों का विवरण उपलब्ध है। इसके अनुसार वास्तु के 64 पदों में चार पद ब्रह्मा तथा चार-चार ही चारों अर्यमा के, कोने के आठों देवों के दो-दो, बाहर के आठों का आधा-आधा पद तथा शेष सभी देवों का एक-एक पद बनाना चाहिए। इसी तरह 81 पदों के वास्तु में नौ पद ब्रह्मा, अर्यमा

देवों के छह-छह, आठों देवों के दो-दो, बाहर आठों देवों का आधा-आधा तथा अन्य देवों का एक-एक पद निर्मित करना चाहिए-चतुष्षष्टिपदे एकाशीतिपदे च वास्तौ देवानां न्यासक्रमः- ब्रह्मा वेदपदस्तु तेन समका देवार्यमाद्यास्त्वमो कोष्ठोष्टौ द्विपदास्तथाष्ट मरुतः कोणेऽर्द्धभागाद्बहिः। शेषा एकपदाः सुरास्तु कथिता वेदर्तुकेऽथो नव ब्रह्मा षट्पदिनोऽर्यमादि विबुधा ईशादयश्चैकशः॥ (2,13)

अथ वास्तुदेवताः

ईशो मूर्धनि पर्जन्यो दक्षिणं कर्णमाश्रितः।

जयस्कन्धे महेन्द्राद्याः पञ्च दक्षिण(लक्षण ?) बाहुगाः॥ 103॥

अब वास्तु पुरुष के विभिन्न अङ्गों पर स्थित देवताओं का वर्णन किया जा रहा है। वास्तु पुरुष के सिर पर ईशदेव दक्षिणकर्ण पर पर्जन्य, दक्षिण स्कन्ध पर जय तथा दक्षिण बाहु पर अधोल्लिखित पाँच देवता स्थित हैं।

पूजनादि देवताओं का न्यासक्रमचक्रम्

चरकी — पूर्व — विदारिका

ईश	प.	ज.	इ.	सू.	स.	भृ.	आ.	अ.
दिति	आप आपवत्स		अर्यमा			सावित्र सविता		पू.
अदिति								वि.
शैल	पृथ्वीधर		ब्रह्मा			विवस्वान		गृ.
कुबेर								य.
भल्लाट								ग.
मुख्य	रुद्र रुद्रदास		मैत्र महेंद्र जय					भृ.
नाग								मृ.
रो.	पा.	शे.	अ.	व.	पु.	सु.	न.	पि.

उत्तर (बाएँ) — दक्षिण (दाएँ)

पाप — पश्चिम — पूतनिका

महेंद्रः सूर्य(माहेन्द्रादित्य ?) सत्याश्च भृश आकाशमेव च।
वह्निर्जानुनि पूषाद्याः सप्त पादोनले(पादनली ?)स्थिताः॥ 104॥

बाहु पर स्थित पाँच देवताओं के नाम हैं- इन्द्र, सूर्य, सत्य, भृश और आकाश देव। आग्रेयकोण स्थित जानु पर अग्नि तथा दक्षिण पदनलिका पर पुषादि सात देवताओं का निवास होता है।

पूषाथ वितथश्चैव गृहक्षतो यमस्तथा(गृहरक्षयमावुभौ ?)।

गन्धर्वो भृङ्गराजश्च मृगः सप्त सुरा इति॥ 105॥

पूषादि सात देवताओं के नाम हैं- पूषा, वितथ, गृहक्षत, यम, गन्धर्व, भृङ्गराज और मृग।

पादयोः पितरस्तस्मात् सप्त पादतल(पादनली, -लता ?) स्थिताः।


दौवारिकोऽथ सुग्रीवो(: ?) पुष्पदन्तो जलाधिपः॥ 106॥

वास्तु पुरुष के दोनों पैरों पर पितृगण तथा वाम पदतल पर सात देवताओं का निवास है। ये देवता हैं- दौवारिक, सुग्रीव, पुष्पदन्त, जलाधिप या वरुण-

असुरः शोष(शेष ?) यक्ष्मा च रोगो जानुनि संस्थितः।

नागो मुख्यश्च भल्लाटः सोमोऽ-गिरिश्च(ङ्गिराश्च ?) बाहुगाः॥ 107॥

वाम पदतल स्थित शेष देवता हैं- असुर, शोष और पापयक्ष्मा। वाम भुजा पर पाँच देव स्थित होते हैं- नाग, मुख्य, भल्लाट, सोम (कुबेर?) और गिरि (अङ्गिरा ?)।



वास्तुपूजाचक्रं

अदितिः स्कंधदेशे(अदितिस्त्वधदेशे ?) च वामे कर्णे दितिः स्थितः।

द्वात्रिंश, द्वाह्यगा देवा नाभिपृष्ठे स्थितो विधिः ॥ 108 ॥

वाम स्कंध पर अदिति और वाम कर्ण पर दिति देव स्थित हैं। इस तरह ये कुल बत्तीस देव वास्तु पुरुष के बाह्याङ्गों पर अवस्थित होते हैं और मध्य में नाभि के पृष्ठदेश पर ब्रह्मा की स्थिति होती है।

अर्यमा दक्षिणे-वामे स्तने तु पृथिवीधरः।

विवस्वानऽथ मित्रश्च दक्षवामोरुगावुभौ ॥ 109 ॥

अब आन्तरिक अङ्गस्थ देवों के विषय में जाने कि दक्षिण स्तन पर अर्यमा, वाम स्तन पर पृथिवीधर देवता की स्थिति है। दक्षिण उरु पर विवस्वान तथा वाम उरु पर मित्रदेव अवस्थित होते हैं।

आपस्तु गलके(मलको ?) वास्तोरापवस्तो(-रायवस्तो ?) हृदि स्थितः।

सावित्री(सावित्र ?) सविता तद्वत् करं दक्षिणमाश्रितौ ॥ 110 ॥

इसी प्रकार वास्तु पुरुष की ग्रीवा पर आपदेव, हृदय पर आपवत्स, दक्षिण हाथ पर सावित्री तथा सविता की स्थिति हैं।

इन्द्र इन्द्रजयो मेढ्रे(मेन्द्रेढ्रे ?) रुद्रोऽसौ वाम(बाह ?)हस्तके।

रुद्रदासोऽपि तत्रैव इति देव(वेद ?)मयं वपुः ॥ 111 ॥

मेढ्रस्थान पर इन्द्र और इन्द्रजय, वाम हाथ पर रुद्र और रुद्रदास की स्थिति है। इस प्रकार कुल पैंतालीस देवताओं की अवस्थिति वास्तुपुरुष-देह पर कही गई है।

कोणस्याष्टदेवी:

ऐ(ई ?)शान्ये चरकी बाह्ये पिलिपिच्छास्तु(पीलीपीछातु ?) पूर्वतः।

विदारिकाग्निकोणे च जृम्भा याम्यदिगाश्रिता(विजृम्भायादिगामिता ?) ॥

अब वास्तुमण्डल के बाह्यभाग में स्थित आठ देवियों के विषय में कहा जा रहा है। बाहर ईशान कोण के उत्तरी भाग में चरकी तथा पूर्व में पीलीपिच्छा, आग्नेयकोण में पूर्व में विदारिका व दक्षिण में जृम्भादेवी स्थित हैं।

नैर्ऋत्ये पूतना स्कन्दा(स्कन्धे ?) पश्चिमे वायुकोणके।

पापराक्षसिका सौम्येऽर्यमैवं(यमं वै ?) सर्वतोऽ(सम ?)र्च्चयेत् ॥ 114 ॥

नैर्ऋत्यकोण में दक्षिण में पूतना व पश्चिम में स्कन्दा, वायव्यकोण में पश्चिम में पापरक्षिका तथा उत्तर में अर्यमादेवी की अवस्थिति कही गई है।

देवी(देवि ?) क्रूरान्यमन्दीश्च(क्रूरार्यमादीश्च ?) माषान्नैः सुरयामिषैः।

अपरान् घृतपक्वान्नैः(वृकानैश्च ?) सर्वान् स्वर्णसुगन्धिभिः ॥ 115 ॥

इति वास्तुपुरुषन्यासः।

पूजाकाल में देवियों तथा क्रूर देवता, यमादि को माषान्न या उड़द के बाकलों, सुरा व आमिष से संतुष्ट करें तथा शेष अन्य देवताओं की घृत, पकवान, स्वर्ण सहित सुगंधित पदार्थों से पूजा करें।

वशिष्ठसंहिता में वास्तुपूजा की विधि 'वास्त्वध्याय' में इस प्रकार बताई है- निर्माणे मंदिराणां च प्रवेशे त्रिविधेऽपि वा॥ वास्तुपूजा तु कर्त्तव्या यस्मात्तां कथयाम्यथः। गृहमध्ये हस्तमात्रं समन्तात्तण्डुलोपरि॥ एकाशीतिपदं कार्य्यं तिलैस्तुल्यं सुशोभनम्। एकद्वित्रिपदाः पञ्चचत्वारिंशत्सुरोर्चिताः॥ द्वात्रिंशद्वाह्यतो वक्ष्यमाणाश्चान्तस्त्रयोदश। तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः॥ तत्राग्निशम्भुकोणस्थस्त्वसौ चैव पदेश्वरः। तस्माद्द्वितीयः पर्जन्यश्चासावेकपदेश्वरः॥ जयन्त्येन्द्रार्कसत्याख्या भृशाश्च द्विपदेश्वराः। आकाशवायूपरतः क्रमादेवपदेश्वराः॥ एवं प्राच्यां नव ज्ञात्वा नवमे वान्यदिक्षु च। आद्याश्चान्तावेकपादा द्विपादाः पञ्च मध्यमाः॥ अष्टौ पितृगणाधीशा यमांताः पश्चिमे सुराः। आद्यंतौ द्वौ चैकपदौ द्विपदाः पञ्च मध्यगाः॥ रोगादिरित्यन्त्सुराः सप्त सौम्यदिशि क्रमात्। तदधस्थश्चतुष्कोणेष्वीशानादिषु च क्रमात्॥ आपः सावित्रविजय-रुद्राश्चैकपदेश्वराः। मध्ये नवपदो ब्रह्मा तस्येशानादिकोणगाः॥ आपवत्सोऽथ सविता विबुधाधिपसंज्ञकाः। राजयक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः॥ ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी। अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात्॥ स्वस्वस्थानेषु देवेषु स्थापितेष्वीदृशं भवेत्। कोणेषु पञ्च पञ्चैव चतुर्ध्वैकपदाः सुराः॥ प्रागादिदिक्षु द्विपदाः पञ्च पञ्च यथाक्रमात्। ब्रह्मणः पूर्वतो दिक्षु द्विपदाः स्युः समीपगाः॥ हिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः। सूर्यसत्यौ भृशाकाशौ वायुः पूषा च वै तथा॥ गृहक्षतः पितृपतिर्गन्धर्वो भृङ्गराजक :। मृगः पितृगणाधीश स्थाप्यो दौवारिकाह्वयः॥ सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः। शोषः पापश्च रोगो हि मुखो भल्लाट एव च॥ सोमसर्पौ दित्यदिती द्वात्रिंशदमराः स्मृताः। आपश्चैवापवत्सश्च जयो रन्ध्रस्तथैव च॥ मध्ये नवपदो ब्रह्मा तस्थौ तस्य समीपगः। प्रागाद्यन्तरिता देवाः परितो

ब्रह्मणः स्मृताः॥ अर्यमा सविता चैव विवस्वान्विबुधाधिपः। मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात्॥ आपवत्सोऽष्टमः पञ्चचत्वारिंशत् सुरोत्तमाः। ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहितान्यसेत्॥ वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः। प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः॥ शुक्लवस्त्रयुगं दद्याद् धूपदीपफलैः सह। अपूपैर्भूरि नैवेद्यैर्वाद्यैः सह समर्पयेत्॥ ताम्बूलं च ततो दद्याद्देवेभ्य पृथक्पृथक्। दत्त्वा पुष्पाञ्जलिं कर्ता प्रार्थयेद्वास्तुपूरुषम्॥ विप्रेभ्यो भोजनं दत्त्वा स्वयं भुञ्जीत बन्धुभिः। नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो॥ मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा। इति प्रार्थ्य ततो दद्याद्दक्षिणामर्चकाय च॥ एवं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः। आरोग्यं पुत्रपौत्रादि धनधान्यं लभेन्नरः॥ वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे। रोगान्नानाविधान् क्लेशानश्नुते सर्वसङ्कटान्॥ (39, 196–223 तुलनीय– नारदसंहिता 32, 1–20)

अथशास्त्रप्रशंसा:

एकेन शास्त्रेण गुणाधिकेन विना द्वितीयेन पदार्थसिद्धिः।

तत्समात् (तः ?) प्रा (प्र ?)कारान्तरतो विलोक्यं

मणिर्गुणाढ्योऽपि सहायकाङ्क्षी॥ 116॥

प्रासादमण्डनम् ग्रंथ की प्रशंसा में इसके रचयिता सूत्रधार मण्डन कहते हैं कि प्रासाद विषयक वास्तुकार्यों के संपादन के लिए यह एक शास्त्र ही पर्याप्त गुणधारक है, तथापि अन्य बहुतेरे शिल्पग्रंथ विद्यमान हैं जिन्हें भी देखना चाहिए। श्रेष्ठ कार्य संपादन और उचित फल के लिए अन्य ग्रंथों का भी सम्यक् अवलोकन किया जाना चाहिए। जिस प्रकार पर्याप्त प्रभविष्णुयुक्त होने पर मणि का काञ्चन के साथ संयोग होने पर महत्व बढ़ जाता है, उसी प्रकार इस ग्रंथ को अन्य ग्रंथों के साथ समीक्षाभाव से देखने पर देववास्तुकार्य के संपादन की श्रेष्ठता मणिकाञ्चनवत् हो जाएगी।

ग्रंथकर्तु निवेदनं-

श्रीविश्वकर्मगणनाथमहेशचण्डी-श्रीविश्वरूपजगदीश्वरसुप्रसादात्।

प्रासादमण्डनमिदं रुचिरं चकार श्रीमण्डनो गुणवतां भुवि सूत्रधारः॥ 117॥

देव वास्तुशास्त्र के प्रणेता भगवान विश्वकर्मा, आद्यपूज्य गणेश, भगवान शिव, भगवती चण्डी और विश्वरूप जगदीश के गुणरूप-प्रसाद से मैंने (सूत्रधार मण्डन ने)

इस प्रासाद मण्डनम् नामक ग्रंथ की रुचि पूर्वक रचना की है।

टीकाकारस्वीकारोक्तिं-

क्षेत्रार्कसूनुमण्डनरचिते प्रासादमण्डनम् नाम च।

नाना देवायतनविधय च न्यास-प्रतिष्ठाचारयो॥

शशि$_1$रस$_6$ख$_0$यमलाब्दयो$_2$ सुमधुमासे तथा।

पूर्णिमायां शुभकाले टीकेयं पूर्णतागताम्॥

इति श्री सूत्रधार मण्डनविरचिते वास्तुशास्त्रे प्रासादमण्डने जीर्णोद्धारविधिदोषार्देवपुरराजपुराणिमण्डपस्यदिङ्निर्देशे अष्टमोऽध्यायः॥ 8॥

॥ श्री सम्पूर्णोऽयं ग्रंथः॥

परिशिष्ट- 1

अथ शिलान्यासपद्धतिः

जगदम्बावलम्बाय निरालम्बाय शूलिने।

जगत्त्रयमुटुम्बाय नमः साम्बाय शम्भवे॥ 1॥

यजमानः सस्त्रीकः शुचिः प्राङमुख उपविश्य दीपं प्रज्वलय्याचम्य प्राणानायम्य शान्तिपाठादि पठित्वा कुशयवजलादीन्यादाय सङ्कल्पं कुर्यात। ॐ तत्सदद्य अमुकोऽहं गृह(देवालय) निर्माणाय शिलान्यासं करिष्ये। तत्पूर्वाङ्गत्वेन गणपतिपूजनं स्वस्तिवाचनं च करिष्य इति सङ्कल्पं कुर्यात।

(1) वास्तुशान्तिकरणपक्षे 'तत्रादौ सर्वोपद्रवशान्तिपूर्वकम् आयुरारोग्य-पुत्रपौत्रद्विपद-चतुष्पद-धनधान्यादिसमृद्धये ग्रहयज्ञसहितां वास्तुशांति करिष्ये' इति च सङ्कल्पयेत्। तत उपशिलासहिताः पञ्चशिलाः (2) पीठे संस्थाप्य ताम्रमयान् मृन्मयान् वा द्वाविंशतिकलशान् आजिघ्रेति संस्थाप्य तेषु (3) मृत-पञ्चपल्लववृक्षीयकषाय-गन्ध-गोमूत्र-गोमय-मिलितपञ्चगव्य-दुग्ध-गन्धोदक दधि-गन्धोदक-घृत-गन्धोदक-मधु-गन्धोदक शर्करा-गन्धोदक-फल-रत्न-वृष-शृङ्गोदक-सप्तधान्य-तीर्थ जल-गन्धान् क्रमेण प्रक्षिप्य शिला वस्त्रेणाच्छाद्य मन्त्रैः स्नापयेत्।

तद्यथा-प्रथमं सप्तमृत्तिकोदकेन- ॐ अग्निर्मूर्द्धा० अश्वत्थ-प्लक्षवटो-दुम्बर-वेतसमूलसंभवैः पञ्चकषायैः ॐ यज्ञायज्ञा वो अ० इति, गायत्र्या गोमूत्रेण, गन्धद्वारामिति गोमयेन, गन्धद्वारामिति गन्धोदकेन, पयःपृथिव्याम् इति मिलितपञ्चगव्येन, गन्धोदकेन, दधिक्राव्ण इति दध्ना, गन्धोदकेन, घृतवती इति घृतेन, गन्धोदकेन, मधुव्वाता इति घृतेन, गन्धोदकेन, आयंगौः इति शर्करया, गन्धोदकेन याः फलिनीरिति फलेन परिवाजपति-रिति रत्नोदकेन, हिरण्यगर्भ इति सुवर्णोदकेन, हविष्मतीरिति वृषशृङ्गोदकेन, ओषधय इति सप्तधान्योदकेन, इमं मे इति तीर्थोदकेन, गन्धद्वारामिति गन्धोदकेन च संस्नाप्य वस्त्रेण परिमार्ज्य सुवर्णादिशलाकया कुङ्कुमादिना नन्दा-भद्रा-जया-रिक्तापूर्णेति नाम्नेषु पञ्चसु शिलासु क्रमेण (4) पद्मम् सिंहासनम्, तोरण-छत्रे कूर्मम् चतुर्भुजं विष्णु च लिखित्वा शिलानां मूलेषु अभिषेकं कुर्यात पञ्चभिर्मन्त्रैः क्रमेण (5) आ ब्राह्मन, ॐ भद्रं कर्णे-भिः, ॐ जातवेदसे, ॐ यमाय त्वाऽङ्गिरस्वते, ॐ पूर्णा दर्वि, इति।

ततः शिलानां मध्येऽभिपिञ्चेत्-ॐ नाभिर्मे 10 ॐ ब्रह्म यज्ञानम्, ॐ विष्णो रराटम् ॐ नमस्ते रुद्र ॐ इमं देवाः इति मन्त्रैः।

ततः शिलानां शिरस्सु (6) क्रमेण ब्रह्माणं, विष्णुम्, रुद्रम, ईश्वरम, सदाशिवं च क्रमेणावाह्य ततो नन्दायै नमः नन्दामावाहयामि इत्येवं भद्रा जया रिक्ता पूर्णाश्चावाह्य सम्पूज्य अग्निं प्रतिष्ठाप्य ॐ नन्दायै स्वाहा ॐ भद्रायै स्वाहा ॐ जयायै स्वाहा ॐ रिक्तायै स्वाहा ॐ पूर्णायै स्वाहा इति घृतेनाष्टोत्तरशतमष्टाविंशत्यष्टान्यतमसङ्ख्यया हुत्वा याते रुद्र शिवा तनूरघोरा इति अष्टोत्तरशतमाहुतीः शान्त्यर्थं हुत्वा प्रोक्षणीस्थान् संस्रवान् स्थण्डिलस्योत्तरतः स्थापितकलशे निक्षप्य (7) तेनोदकेन शिलानां मूलमध्यश्रिः सकुशैरभिषिच्य भूमिं संपूज्य वास्तु-भूमेरीशानादिकोणेषु चतुर्हस्तं गर्त खात्वा गोमयेनोपलिप्य तत्र सर्पाकारं वास्तुपुरुषमक्षतैर्लिखित्वा 'आवाहयाम्यहं देवं भूमिष्ठं चाप्यधोमुखम्। वास्तुनाथं जगत्प्राणं पूर्वस्यां प्रथमाश्रितम्।' इत्यावाह्य ॐ वास्तोष्पते इति संपूज्य प्रार्थयेत्। ॐ वास्तु पुरुष नमस्तेऽस्तु भूशय्याभिरत प्रभो। मद्गृहं धनधान्यादिसमृद्ध कुरु सर्वदा, इति।

(8) तत ईशानकोणे उपशिलां संस्थाप्य तस्या मध्यगर्ते मध्वाज्य-पारदपञ्चरत्नगर्भितं पिहितमुखं पद्मकलशं (9) गन्धपुष्पादिभिरलङ्कृतं निधाय ॐ पद्माय नमः ॐ आधारशिलायै नमः इति संपूज्य तस्य वामभागे दीपं संस्थाप्य (10) कलशोपरि प्राकशिरसं नन्दाम् ॐ स्थिरो भव ॐ नाभि मे इति मन्त्रद्वयेन संस्थाप्य संपूज्य प्रार्थयेत्- ॐ नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम्। वेश्मनि त्विह सन्तिष्ठ यावच्चन्द्रार्कतारकाः। आयुः कामं श्रियं देहि देववासिनि नन्दिनी। अस्मिन् रक्षा त्वया कार्या सदा वेश्मनि यत्नतः'। इति। एवमेव आग्नेयादिकोणतुष्टये मध्ये च चतुर्हस्तगर्त खात्वा वास्तुं विलिख्य संपूज्य आधारशिलासु कलशान् संस्थाप्य तद्वामपार्श्वेषु दीपान् संस्थाप्य तत्र शिलाः संस्थाप्य संपूज्य प्रार्थयेत्-

भद्राप्रार्थनामन्त्रः:-भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि। आयुर्दा कामदा देवि सुखदा च सदा भव। त्वामत्र स्थापयाम्यद्य गृहेऽस्मिन् भद्रदायिनि।

जयाप्रार्थनामन्त्रः:- गर्गगोत्रसमुद्भूतां त्रिनेत्रां च चतुभुऽजाम्। गृहेऽस्मिन् स्थापयाम्यद्य जयां चारुविलोचनाम्। नित्यं जयाय भूत्यै च स्वामिनी भव भार्गवि।

रिक्ताप्रार्थनामन्त्रः:- रिक्ते त्वं रिक्तदोषघ्ने सिद्धिभुक्तिप्रदे शुभे। सर्वदा पर्वदोषघ्नि तिष्ठास्मिंस्तत्र नन्दिनि।

पूर्णाप्रार्थनामन्त्रः:- पूर्णे त्वं सर्वदा पूर्णान् लोकानां कुरु काश्यपि। आयुर्दा कामदा देवि धनदा सुतदा तथा। गृहाधारा वास्तुमयी वास्तुदीपेन संयुता। त्वामृते नास्ति जगतामाधारश्च जगत्प्रिये'।

ततः सदीपं पायसबलिं माषभक्तबलिं वानन्दाये नमः इत्यादिनाममन्त्रैर्दत्वा शान्तिकाध्यायं च पठित्वा दक्षिणां दत्वा ब्राह्मणभोजनं भूयसीं च संकल्प्य कर्मेश्वरार्पणं कुर्यादिति शिलान्यासः।

इति शुभम्।

----

1. 'प्रासादभवनोद्यानप्रारम्भे परिवर्तने। पुरवेश्मप्रवेशेषु सर्वदोषापनुत्तये' इति मात्स्यात् सर्वदोषापनोदफलार्थं गृहप्रारम्भ-गृहप्रवेशयोर्वास्तुशान्तिरावश्यकी॥ गृहप्रारम्भश्च शिलान्यासरूप एव। सवास्तुशान्तिशिलान्यासे मण्डपकुण्डादिकरणं च सति संभवे विधेयम्। मण्डपसत्वे सदस्य-होतृ-द्वारपालादिवरणमप्यावश्यकमिति। वास्तुशान्तिश्च केवलं पौराणकी शिलान्यासेऽनुष्ठेया'न समुचिताया गृहप्रवेश एवं विधानादिति।

2. शिलाश्चशिरःपृष्ठेषुकृतचिह्नाःपाषाणमय चेद गृहं तदा एकविंशत्यङ्गुल-दीर्घाःसप्तदशाङ्गुलदीर्घाः, त्रयोदशाङ्गुलदीर्घाः नवाङ्गुलदीर्घाः क्रमेण विप्र क्षत्रिय-वैश्य-शूद्राणाम् तथा दैर्घ्यप्रमाणार्धप्रमाणविशालाः, विशालतोऽर्धो च्छ्रयाश्चतुरस्राः समाः श्लक्ष्णाः कार्याः। 'शिलाप्रमाणं क्रमशः प्रदिष्टं वर्णानुपूर्व्येण तथाऽङ्गुलानाम्। अथैकविंशद्-धन-विश्व-नन्दाविस्तारके व्यासमितं तदर्द्धम्। तदर्द्धमान स्थल पिण्डिका स्यात् ऊर्ध्वाधिका न्यूनतरा न कार्या' इति विश्वकर्मोक्तेः। 'एकविंशद् द्विजाज्ञाणां क्षत्राणां दश सप्त च। त्रयोदश तु वैश्यानां शूद्राणां' तु नवाङ्गुलम्' इति स्मृत्यन्तराच्च। प्रासादे तु हस्तायामाः कार्याः:- 'प्रासादादौ विमानेन न्यस्तव्याः सुमनोहराः। चतुरस्राः समाः कृत्वा समन्तादधस्तसंमिताः इति विश्वकर्मोक्तेः। ऐष्टकं चेद् गृहं तदा वितस्त्यायताः षडङ्गुलविस्ताराः द्वि-चतुरङ्गुलोच्छ्राया इष्टकाः कारयितव्याः। 'इष्टकाश्च सुपक्वाः स्युर्द्वादशांगुलसंमिताः। विस्तारस्य त्रिभागेण वैपुल्येन समन्विताः' इत्यग्निपुराणे (अ० 45) उक्तेः। आयामतुल्यविस्तारकरणे चतुरङ्गुलस्थूलाः तदर्धविस्तारकरणेद्व्यङ्गुलस्थूला। इष्टकाः कार्याः शिलाविस्तारस्य द्विविधस्य दृष्टत्वेन इष्टकाविस्तारस्यापि तथाविधस्य ग्रहीतुमुचितत्वादिति।

3. मृद्भिर्गोमयगोमूत्रकाषायैर्गन्धवारिणा। विधिना पञ्चगव्येन स्नानं पञ्चामृतेन च। गन्धतोयान्तरं कुर्यात्रिजनामा-ङ्किताणुता। फलरत्नसुवर्णानां गोशृङ्गसलिलैस्ततः। चन्दनेन समालभ्य वस्त्रैराच्छादयेच्छिला' इति स्नानप्रकारः अग्निपुराणे (अ० 92) उक्तः। मन्त्राश्च 'अग्निर्मूर्द्धा' इत्यादयो विश्वकर्मप्रकाशे (अ० 5 श्लो० 64) उक्ताः।

4. नन्दा-भद्रा-जया-रिक्ता-पूर्णा इत्याख्यासु पञ्चसु शिलासु क्रमेण पद्म, सिंहासनं, तोरणच्छत्रे, कूर्म, चतुर्भुजं विष्णुं च टङ्केण लेखयेत्। नन्दादिशिलानां च स्थापनार्थं किञ्चित्तदधिकप्रमाणान्

शिलामयानेवाधारान् कल्पयेत् ता उपशिला इत्युच्यन्ते। उपशिलासु पद्मादि निधिकुम्भस्थापनार्थं मध्ये एकैकं गर्तं कारयेत्।

5. 'आ ब्रह्मन्निति नन्दाया भद्रं कर्णेति वै तथा। जातवेदसेति. च तथा यमायत्वेतिमन्त्रकैः। पूर्णा दर्वीति पूर्णायाः क्रमेणापि समाचरेत्। मूले, मध्येऽपि च तथा नाभिमेति च मन्त्रकैः ब्रह्म यज्ञानमिति च विष्णो रण्टमिति तथा। नमस्ते रुद्र इति च इमं देवेति संन्नपेत्।

6. शीर्षे चावाहनं कुर्यात् तद्विष्णोः परमं पदम्। इदं विष्णुः समख्ये च त्र्यम्बकं मूर्द्धानं दिवः' इति नन्दादिशिलानां मध्यशिरःसु अभिषेकः, शिरःसु आवहनं चोक्तम्।

7. 'प्रोक्ष्याः शान्तिजलैः शिलाः इत्याग्निपुराणात् (अ० 92) संस्रवज-लैरभिषेकः।'

